षष्ठः पाठः
६

# स्वास्थ्यम्

(ईकारान्तःस्त्रीलिङ्गः तृतीयाविभक्तिः च)

(स्वस्थशरीरे स्वस्थं मनः वसति। अतः शरीरस्य आरोग्यम् महदावश्यकम् एव। पाठेऽस्मिन् वयम् आरोग्यरक्षणस्य उपायान् ज्ञास्यामः।)







**अध्यापिका** – सरले! ह्यः त्वं कक्षायां किमर्थम् न उपस्थितवती?

**सरला** – महोदये! रात्रौ महती अर्धशिरोवेदना आसीत्।

**अध्यापिका** – प्रथमवारम् एव जाता वा?

**सरला** – नहि महोदये! वर्षत्रयाद् एषा पीडा अस्ति पूर्वम् सह्या आसीत् किन्तु इदानीं तु असह्या।

**अध्यापिका** – अतीव चिन्तनीयमिदम्। वैद्येन सह परामृष्टवती किम्?

**सरला** – आम्। परामृष्टवती किन्तु वैद्येन दत्तम् औषधम् खादामि तदा पीडा शाम्यति अनन्तरम् तु पुनः वर्धते।

**अध्यापिका** – यदा औषधसेवनं रोगान् न उन्मूलयति, तदा योगोपचारः कर्तव्यः। योगकक्षां गत्वा योगशिक्षिकया मार्गदर्शनं स्वीकुरु। सा चिकित्सां करिष्यति।

**सरला** – योगोपचारः कथं भवति।

**अध्यापिका** – विविधैः आसनैः प्राणायामेन च। यथा पद्मासनम्, भ्रामरी, अनुलोम-विलोमः, कपालभातिः इत्यादीनि।

**सरला** – तर्हि श्वः रविवासरः। अहं श्वः एव योगशिक्षिकया सह मेलिष्यामि। (रविवासरे सरला योगशिक्षिकासमीपम् गच्छति)

**सरला** – नमस्ते भगवति! अहं सरला! मम शिक्षिका देवी रमा भवत्या सह मेलितुं मां प्रेरितवती। मम शिरसि अर्धभागे वेदना भवति।



**योगशिक्षिका** – आगच्छ इदानीं योगकक्षा प्रचलति, त्वम् अपि भागं स्वीकुरु?

**सरला** – आम् आगच्छामि।

**योगशिक्षिका** – आदौ सिद्धासनं, पद्मासनं च कारयिष्यामि? एतेषाम् अभ्यासेन एकस्थितौ उपवेशनं स्थिरं भवति। तदा अध्ययने, कार्ये, प्राणायामे च काठिन्यं न स्यात्।



**सरला** – कः एषः प्राणायामः? किम् एतद् अपि आसनम्?

**योगशिक्षिका** – न प्राणायामेन श्वासोच्छ्वसनं नियन्त्रितं भवति। अनेन हृदयरोगे, नासिकारोगे, श्वासरोगे च लाभाः भवन्ति।



**सरला** – योगकक्षा किमर्थं प्रातरेव आयोज्यते?

**योगशिक्षिका** – प्रातःकाले सूर्यः शान्तः, वायुः शीतलः,निर्मलः च भवति। प्रातः कालः सुखकरः भवति। योगः प्राकृतिकः उपचारः। अतः प्रातः कालः योगाय उचितः।



**सरला** – तर्हि अहं योगाभ्यासाय प्रतिदिनम् आगमिष्यामि।

**योगशिक्षिका** – पुनरागमनाय गच्छतु भवती।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| ह्यः | गतदिनम् | बीता हुआ कल |
| श्वः | आगामिदिनम् | आने वाला कल |
| वैद्यः | चिकित्सकः | चिकित्सक |
| अभिमतम् | संस्तुतिः | सलाह |
| कारयिष्यामि | कर्तुं प्रेरयिष्यामि | कराऊँगी/कराऊँगा |
| उन्मूलयति | नाशयति | मिटाती है |
| क्षुधाभावः | बुभुक्षायाः अभावः | भूख न लगना |
| सम्यक् | साधु | ठीक |
| स्थगिते | विरामे | बन्द करने पर |
| चिकित्सा | उपचारः | उपचार |
| सुकरम् | सरलम् | सरल |
| प्रातरेव | प्रातःकाले एव | सवेरे |
| वैद्येन | चिकित्सकेन | चिकित्सक के द्वारा |
| शिरसि | मस्तके | सिर में |
| विविधैः | अनेकैः | अनेक प्रकार के |

## अभ्यासः

**१. निम्नपदानाम् उच्चारणं कुरुत -**

ह्यः, क्षुधाभावः, उदरपीडा, मार्गदर्शनम्, स्वीकुरु, सिद्धासनम्, मनोनिग्रहार्थम्।

**२. निम्नलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) सरलायाःकृते औषधयोजनां कः अकरोत्?

(ख) शरीरं चित्तं च केन स्वस्थं भवति?

(ग) कः कालः योगाय उचितः भवति?

(घ) श्वासोच्छ्वसनं केन नियन्त्रितं भवति?

**३. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

| प्राकृतिकः, योगस्य, मार्गदर्शनम्, पीड़ा |
|---|

(क) स्थगिते औषधे पुनः .................. प्रादुर्भवति।

(ख) योगशिक्षिकायाः ......................स्वीकुरु।

(ग) ............................ अभ्यासेन अनेके लाभाः सम्भवन्ति।

(घ) योगः ...................................... उपचारः।

**४. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

(क) योगाभ्यासेन कार्ये कौशलं जायते।

(ख) आसनानि सन्धिरोगान् उन्मूलयन्ति।

(ग) अहं श्वः योगशिक्षिकया सह मेलिस्यामि।

(घ) सर्वं गुरोः निर्देशने करणीयम्।

**५. विलोमपदानि योजयत -**

| | |
|---|---|
| (क) उपस्थिताः | सायङ्कालः |
| (ख) स्वस्थः | दुष्करं |
| (ग) सुकरं | हानयः |
| (घ) लाभाः | अस्वस्थः |
| (ङ) प्रातःकालः | अनुपस्थिताः |

**६. निम्नपदानि आधारीकृत्य वाक्यनिर्माणं कुरुत -**

वैद्यः, औषधिः, रोगान्, सुकरं, अपश्यत्, कक्षायाम्

**७. रेखाङ्कितपदानि आधृत्य रूपाणि परिवर्तयत -**

बालकः कन्दुकेन क्रीडति  बालिका द्विचक्रिकया गच्छति  नापितः कर्तर्या केशान् कर्तयति

**यथा -** **चमसः - चमसेन  शाटिका - शाटिकया  लेखनी - लेखन्या**

| | | |
|---|---|---|
| (क) चषकः - .................. | (ङ) माला - .................. | (झ) द्रोणी- .................. |
| (ख) दर्पणः - .................. | (च) शाखा - .................. | (ञ) नगरी- .................. |
| (ग) दीपः - .................. | (छ) लता - .................. | (ट) नर्तकी -.................. |
| (घ) जलम् - .................. | (ज) स्थालिका-.................. | (ठ) नारी - .................. |

## ८. कोष्ठके प्रदत्तशब्दस्य उचितरूपेण वाक्यं पूरयत -

(क) वृद्धः...................................... गच्छति। (दण्डः)

(ख) ..................................... प्रकाशः भवति। (गोलदीपः)

(ग) भगिनी.............................. शाकं कर्तयति। (छुरिका)

(घ) लेखिका....................................लिखति। (लेखनी)

(ङ) अधिकारी....................... कार्यालयं गच्छति। (कारयानम्)

## ९. तृतीयाविभक्तेः द्विवचने बहुवचने च रूपाणि परिवर्तयत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा - | हस्तेन | हस्ताभ्याम् | हस्तैः |
| (क) | जनेन | ................. | ................. |
| (ख) | वृक्षेण | ................. | ................. |
| (ग) | पत्रेण | ................. | ................. |
| (घ) | फलेन | ................. | ................. |
| (ङ) | दर्पणेन | ................. | ................. |
| (च) | दर्पणेन | ................. | ................. |

## १०. अधोलिखितानि रिक्तस्थानानि पूरयत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा - | गौर्या | गौरीभ्याम् | गौरीभिः |
| (क) | लेखन्या | ................. | ................. |
| (ख) | नद्या | ................. | ................. |
| (ग) | पार्वत्या | ................. | ................. |
| (घ) | नार्या | ................. | ................. |
| (ङ) | सख्या | ................. | ................. |
| (च) | माधव्या | ................. | ................. |

## योग्यता-विस्तारः

### १. योगः -

* योगविद्यायाः प्रवर्तकः महर्षिपतञ्जलिः आसीत्। अनेन मुनिना शरीरार्थम् आयुर्वेदस्य, वाणीशुद्ध्यर्थं व्याकरणस्य, मनोनिग्रहार्थं च योगशास्त्रस्य ग्रन्थाः लिखिताः।
* योगस्य अष्टाङ्गानि भवन्ति। यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानं, समाधिः च।
* योगस्य जीवने महत्त्वं विचारयन् संयुक्तराष्ट्रसङ्घेन जूनमासस्य एकविंशत्यां दिनाङ्के अन्ताराष्ट्रियः 'योगदिवसः' उद्घोषितः।

### २. भोजने ध्यातव्यम् -

शुद्धं सात्विकं च भोजनम् एव करणीयम्। श्रीकृष्णोऽपि श्रीमद्भगवद्गीतायां लिखति-

**यातयामं गतरसं पूति पर्युषितं च यत्।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥**

रात्रिकालस्य भोजनं, रसरहितम्, दुर्गन्धयुक्तम्, अन्यद्वारा आस्वादितं, अपवित्रं च तमोप्रवृत्तिदायकं भवति। यथा पिज्जा बर्गर इति व्यवहारे प्रयुज्यं भोजनं हानिकारकम् एव।

### ३. एतानि जानीतः -

स्वास्थ्यवर्धकानि फलानि शाकानि च -

   

| | | | |
|---|---|---|---|
| कदली फलम् | सेवम् | आम्रम् | मधुकर्कटी |
| वृन्ताकः | दाडिमम् | पुष्पशाकम् | नारिकेलफलम् |
| दाक्षाफलम् | कूष्माण्डकम् | पलाण्डु | आर्द्रकम् |
| नारङ्गम् | आलुकम् | कारवेल्लः | मूलकम् |
| गृञ्जनकम् | जम्भीरः | भिण्डीकम् | रक्ताङ्गम् |